MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

भागवतटीकाकाराः

सौरभ-पोडेलः, शोधच्छात्रः, संस्कृतदर्शनविभागस्य,
रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानम्,
बेलुडमठः, हावडा, पश्चिमवङ्गाः – ७११२०२

शोधसारांशः

शोधप्रबन्धोऽयं श्रीमद्भागवतमहापुराणस्य दशप्रमुखानां टीकाकाराणां (श्रीधरस्वामिनः भावार्थदीपिकादीनां) देश-काल-कृतीनां विस्तृतं, प्रामाणिकम्, ऐतिहासिकञ्च अध्ययनं कृतं वर्तते। भागवतं हि वेदान्तस्य परमगुह्यं तत्त्वम् अस्ति, यस्य यथार्थं रहस्यं केवलं प्राचीनानां टीकाकाराणां साहाय्येन एव अवगन्तुं शक्यते। अत्र प्रत्येकं टीकाकारस्य ऐतिहासिक-सांस्कृतिक-परिदृश्यैः सह तेषां साहित्यिक-दार्शनिक-योगदानानां सूक्ष्मा मीमांसा कृता अस्ति, येन भिन्नकालेषु, भिन्न-भिन्नसम्प्रदायेषु (यथा अद्वैत-द्वैत-अचिन्त्यभेदाभेद-पुष्टिमार्गादिषु) भागवतस्य दर्शनं कथं पल्लवितम् अस्तीति सुस्पष्टं भविष्यति।

अपि चात्र भारतस्य विदेशस्य च विविधेषु ग्रन्थालयेषु उपलब्धानां भागवतटीकानां मातृकाणां (Manuscripts) एका तालिका अपि संयोजिता अस्ति।

अनेन शोधप्रबन्धेन अनेकधा उपकारो भविष्यति:।

प्रथमतः, शोधार्थिनः भागवतस्य टीकाविषये गवेषणायां अत्रत्या तालिका सहायिका स्यात्।

द्वितीयतः, साहित्य-इतिहास-लेखकानां कृते अयं प्रबन्धः टीकाकाराणां यथार्थ-कालनिर्णये, ऐतिहासिक-भ्रान्तीनां निवारणे च सहायको भवेत्।

तृतीयतः, ये सामान्याः जिज्ञासवः पाठकाः भागवतस्य विविध-सम्प्रदायानां दार्शनिकं मतभेदं, तेषां वैचारिकं समन्वयञ्च ज्ञातुम् उत्कण्ठिताः सन्ति, ते अस्मात् प्रबन्धात् एकस्मात् स्थानात् भिन्नपुस्तकानां नामानि प्राप्स्यन्ति।

कूटशब्दाः - सम्पादकः, प्रणेता, संकलकः, प्रकाशकः, अनुवादः।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

शोधलक्ष्यम् – भागवतस्य टीकाकाराणां देशकालकृतिविषये स्पष्टं ज्ञानम्।

शोधप्रविधिः – अत्र भागवतस्य प्रसिद्धानां केषाञ्चन टीकाकर्तृणां देशकालकृतयः संकलय्य लिखिताः। येषां देशकालकृतयः क्वचित् अल्पतया लभ्यते तत्र प्रमाणपुरःसरं देशकालकृतिविषये स्वविचारः प्रस्तुतः। आश्रितग्रन्थसूचिकायामादौ प्रकाशकसम्पादकानुवादकादीनां नामानि लिखित्वा ततः पुस्तकनाम विलिख्य प्रकाशकस्थलानि, वत्सराश्च अनन्तरम् उल्लिखितानि।

भूमिका - भारतीयसंस्कृतेः स्वरूपज्ञानाय पुराणस्य ज्ञानम् अत्यावश्यकम्। पुराणं भारतीयसंस्कृतेः मूलाधारः, तस्मिंश्च भारतीयसमाजः स्वनियमनं प्रतिष्ठापयति। तस्मिन् सम्पूर्णस्य वेदस्य आशयः पूर्णतया निहितः अस्ति। वेदस्मृतिभ्यां यत्तत्त्वं स्पष्टं न प्रतिपादितं तदपि क्वचित् पुराणादिषु वर्ण्यते। श्रीमद्व्यासमहर्षिणा विरचितं प्रसिद्धतमं विष्णोः ऊरुरूपं[i] पुराणं श्रीमद्भागवतमहापुराणम्। भागवतं हि ज्ञानस्य विभायाः प्रसारणेन समम् अध्यात्मरतिं ब्रह्मनिष्ठां भगवद्भक्तिं सदाचारसरणीं[ii] च प्रस्तौति। भगवद्भक्त्या धर्मार्थकाममोक्षाख्यस्य चतुर्वर्गस्य प्राप्तिः भागवते उपवर्ण्यते। अतः अनितरसाधारणमाहात्म्यं भागवतस्य। तस्य उपशतं टीकाः सन्ति इति विद्वांसः अभिप्रयन्ति[iii]। ताः टीकाः प्रकाशिततया अप्रकाशिततया च आदेशम् ग्रन्थागारेषु उपलभ्यन्ते। टीकाकर्तृणां स्वदेशकालादीनाम् उल्लेखः प्रायेण संक्षिप्तः एव उपलभ्यते। क्वचित् न किञ्चित् प्राप्यते। प्रसिद्धतमानां कासाञ्चित् टीकानां कर्तृणां देशकालकृतयोऽत्र संक्षेपेण वर्ण्यन्ते।

1) भावार्थदीपिकाकृत् श्रीधरस्वामी

उपलभ्यमानासु श्रीमद्भागवतमहापुराणस्य टीकासु श्रीधरस्वामिकृता भावार्थदीपिका एव आद्या इति अभिप्रयन्ति विद्वांसः। तत्त्वप्रतिपादनदिशा, शब्दार्थप्रतिपादनदिशा च श्रीधरस्वामी इतरटीकाकारान् अतिशेते। एतस्य वंशपरिचयः सुष्ठुतया नोपलभ्यते। यतो हि जनानां वंशपरिचयः संज्ञया एव ज्ञायन्ते। परन्तु श्रीधरस्वामिनः बह्व्यः संज्ञाः बहुत्र उपलभ्यन्ते, यथा – आत्मप्रकाशटीकायाः मङ्गलश्लोके श्रीधरस्वामी[iv] इति, ब्रह्मसम्बोधिनीटीकायां[v] तस्य श्रीधराचार्यः[vi] इति, पैप्पलादविवाहादिसंस्कारपद्धतौ क्षीरचोरारसिकविनोदस्य द्वितीयाध्यायस्य द्वितीयश्लोके च तस्य श्रीधरगोस्वामी

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

इति, क्वचित् श्रीधरदाश[vii] इति च संज्ञा प्राप्यते। एतस्मात् संज्ञया तस्य वंशपरिचयनिर्णयः सुदुष्करः। तदिदानीं युक्त्या श्रीधरस्वामिनः देशकालादिकं विचार्यम्।

देशः- श्रीधराचार्यास्वामिनः देशकालादिषु विद्वांसः विविधं वदन्ति। कैश्चित् वङ्गदेशीयत्वेन कैश्चित् उत्कलदेशीयत्वेन इतरैः गुर्जरदेशीयत्वेन अपरैश्च महाराष्ट्रदेशीयत्वेन अभिज्ञायते। श्रीधरस्वामिनं गुर्जरप्रदेशजमहाराष्ट्रवासित्वेन स्वीकृतवतां मते एषः भट्टिकाव्यस्य रचयितुः जनकः। परन्तु शासनलिपितः सिद्धेषु चतुर्षु श्रीधरसेनाख्यनृपतिषु अन्तिमस्य पञ्चाशदधिकषट्-शतखीष्टाब्दीयस्य श्रीधरसेनस्य समये भट्टिकाव्यं विरचितम् इति सर्वजनविदितम्। अतः तस्मिन् समये विद्यमानस्य भट्टिकाव्यस्य रचयितुः पिता यदि श्रीधरस्वामी भवेत् तर्हि तस्य कालः अपि सप्तमशतकम् इति ग्रहणीयं, परन्तु श्रीधरस्वामिनः चतुर्दशशतकीयत्वात् न तत् युक्तम्। अतः श्रीधरस्वामी न गुर्जरदेशीयः नापि वा महाराष्ट्रीयः। ये तु बङ्गीयकुलपञ्जिकाकाराः श्रीधरस्वामिनं सन्न्यासग्रहणात् प्राक् श्रीधराचार्यनामकेन, श्रीकरविद्यार्णवस्य पितृत्वेन, शाण्डिल्यगोत्रीयत्वेन, नान्दाग्रामवासित्वेन प्रतिपादयन्ति तेषामपि मतम् अयुक्तं दृढतरप्रमाणाभावात्। उत्कलीयः करुणाकरदासाख्यः कश्चित् शोधकः श्रीधरस्वामि-विरचितस्य कर्मसमुच्चयाख्यस्य अमुद्रिततालपत्रमातृकातः "श्रीक्षेत्रोड्रे वसानं नरहरिमनिशं चिन्तयाम्यात्मरूपम्"[viii] इति सूक्तिम् उद्धृत्य श्रीक्षेत्र इति शब्दबलात् ओड्र इति शब्दात् ओडिशां गृहीत्वा श्रीधरस्वामी उत्कलदेशीयः इति प्रतिपादयति। परन्तु तदपि मतम् अयुक्तमिति मे मतिः कर्मसमुच्चयग्रन्थस्य रचयिता यः श्रीधरः स एव भागवतस्य व्याख्याकारः श्रीधरस्वामी इत्यत्र मानाभावात्। परन्तु मणिकर्णिकाघट्टपरिसरे अमीषां नाम्नैव मठस्य सत्त्वात्, मठे श्रीमन्नृसिंहस्य मूर्तेः च सत्त्वात् इदं तु निश्चप्रचं यत् महानुभवोऽयं वाराणस्याः बिन्दुमाधवमन्दिरस्य अनतिदूरे अववसत्। भगवतः नृसिंहस्य परमोपासकेष्वयमन्यतमः बभूव। तट्टीकायाः बहुत्रास्य विषयस्य समर्थकान्युद्धरणान्युपलभ्यन्ते। यथा एकमुदाहरणं-

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि। यस्यास्ते हृदये संवित् तं नृसिंहमहं भजे॥ इति।[ix] अपि च अन्यैरपि एतत्समर्थ्यते। तथाहि श्लोकः-

व्यासो वेत्ति शुको वेत्ति राजा वेत्ति न वेत्ति वा।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

श्रीधरः सकलं वेत्ति श्रीनृसिंहप्रसादतः॥ इति।

श्रीधरस्वामिनो गुरोर्नाम परमानन्दः इति तु द्वादशस्कन्धस्य समाप्तौ प्रदत्तेन "परमानन्दपादाब्जभृङ्गश्रीः"[x] इति विशेषणेनैव स्पष्टमवबुध्यते। एतद्व्यतिरिच्यापि श्रीमद्भगवद्गीतायाः उपरि स्वविरचितायां सुबोधिनीटीकायाम् अन्तिमश्लोके सः कथयति यत्-

परमानन्दपादाब्जरजःश्रीधारिणाऽधुना।
श्रीधरस्वामियतिना कृता गीतासुबोधिनी॥[xi] इति

कालः- एतेन महानुभवेन विष्णुपुराणस्य आत्मप्रकाशटीकायां चित्सुखाचार्यस्य नोमोल्लेखः कृतः। ऐतिहासिकानां मतानुसारेण चित्सुखाचार्यस्य समयः आसीत् विंशत्यधिकद्वादशशत-तमखीष्टाब्दात् अष्टचत्वारिंशदधिकद्वादशशततमखीष्टाब्दपर्यन्तम्, अतः चित्सुखाचार्यस्य कालाधारेणास्य कालः पञ्चाशदधिकद्वादशशततमखीष्टाब्दात् परमेव।

एतैश्च पुराणविमर्शैः त्रयोदशशतकस्थबोपदेवस्य नामोल्लेखः कृतः, अतोऽस्य कालः त्रिंशताधिकैकसहस्रतमखीष्टाब्दतः प्राक् न स्यात् इति उपपद्यते।

विष्णुपुराणस्योपरि श्रीधरस्वामिना विरचितायाः आत्मप्रकाशटीकायाः प्राचीनतमस्य हस्तलेखस्य समयः द्वाविंशत्यधिकपञ्चदशशततमखीष्टाब्दः। अतः एतेन स्वामिपादस्य समयः पञ्चदशशततमखीष्टाब्दात् पूर्वं भवितुं नार्हति इति सिद्ध्यति।

भण्डारकारप्राच्यगवेषणाप्रतिष्ठानस्य तत्त्वाधारकेण पि.के.गौडे-महाभागेन श्रीधरस्वामिपादस्य समयः पञ्चाशदधिकत्रयोदश-शततमखीष्टाब्दतः पञ्चाशदधिकचतुर्दश-शततमखीष्टाब्दपर्यन्तं स्थिरीकृतः।[xii]

श्रीधरस्वामी तदीयब्रह्मसम्बोधिनीटीकायाम् उल्लिखति – "रागाविष्टे विक्रमादित्यशतके, माघे श्लिष्टे सोमवासरेण दर्शे सिद्धयोगे विष्णुनक्षत्रकृष्टे सिद्धक्षेत्रे"[xiii] एतदनुसारम् एतस्याः रचनाकालः षड्सप्तत्यधिकत्रयोदशशततमखीष्टाब्दः भवति।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

अतः एवम् आलोचनेन श्रीधरस्वामिनां कालः पञ्चाशदधिकत्रयोदशशततमखीष्टाब्दतः पञ्चाशदधिकचतुर्दश-शततमखीष्टाब्दपर्यन्तम् एव सिध्यति।

कृतिः- भागवतस्य भावार्थदीपिका श्रीधरीटीका वा, गीतायाः सुबोधिनीव्यख्या, विष्णुपुराणस्य आत्मप्रकाशव्याख्या, श्रीनृसिंहस्तुतिः (स्तोत्रकाव्यम्), श्रीव्रजविहारस्तोत्रम् (स्तोत्रकाव्यम्), गीतासारविषये ब्रह्मसम्बोधिनीटीका (अनुपलभ्यमाना), कर्मसमुच्चयः (अमुद्रिततालपत्रमातृका), सनत्सुजातीयस्य बालसम्बोधिनीटीका (अनुपलभ्यमाना) च श्रीधरस्वामिना विरचितानि। एतद्व्यतिरिच्यापि भागवतसरणी, गीतासारश्लोकाः इति एतद्वयम् अपि श्रीधरस्वामिनः कृतित्वेन क्वचित् उल्लिख्यते[xiv]।

2) पदरत्नावलीकृत् श्रीमद्विजयध्वजतीर्थः

श्रीमद्विजयध्वजतीर्थः अधोक्षजतीर्थेण प्रतिष्ठापितस्य पेजावरमठस्य गुरुपरम्परायां षष्ठः सन्न्यासी बभूव। अयं महेन्द्रतीर्थस्वामिनः दीक्षां प्राप्य ऊनत्रिंशवत्सरं यावत् पेजावरमठस्य सेवाकर्मणि रत आसीत्। आभारतं सः द्विः तीर्थयात्राम् अकरोत्। सः चित्रपुरानामकस्थाने भट्टाचार्यसम्प्रदायस्य धर्मगुरुणा तर्के लिप्तोऽभूत्, जयं च प्राप्नोत्। ततः पराजितं तं धर्मगुरुं सन्न्यासिनं शिष्यत्वेन गृहीत्वा चित्तपुरायां मठस्यैकस्य प्रतिष्ठाम् अकोरत्। श्रीविश्वेन्द्रतीर्थस्वामिना विरचितेन दूर्गाष्टकस्तोत्रेण, मठस्य ग्रन्थालये उपलभ्यमानेन श्रीपादराजेन विरचितेन स्तोत्रेण, श्रीविश्वपतितीर्थेण विरचितेन विजयध्वजाष्टकस्तोत्रेण, अन्येषां सन्न्यासिनां महतां कवीनां कर्मणा च तस्य विजयध्वजस्वामिनः माहात्म्यं जेगीयते।

देशः- पेजावरमठस्य अथवा अधोक्षजमठस्य मध्वसाम्प्रदायिकः षष्ठसन्न्यासी श्रीमद्विजयध्वजतीर्थः। एतस्य गुरोः नाम महेन्द्रतीर्थः शिष्यश्च उत्तमतीर्थः।

कालः- एतन्महात्मनां कालः एकाशीत्युत्तरत्रयोदशशततमखीष्टाब्दात् (१३८१) दशाधिकचतुर्दशशततमखीष्टाब्दपर्यन्तमिति (१४१०) स्पष्टं मठस्य परम्परायाम्[xv] उल्लिख्यते। दशाधिकचतुर्दशशततमखीष्टाब्दस्य वैशाखमासस्य द्वादशदिनाङ्के सः काण्वतीर्थस्य समीपे स्वदेहम् अत्यजत्, तच्च

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

स्थानम् अधुना श्रीविजयध्वजतीर्थवृन्दावनम् इति नाम्ना ज्ञायते। श्रीविजयध्वजतीर्थवृन्दावनस्य जालपत्रे[xvi] विजयध्वजतीर्थः वैशाखमासस्य तृतीयदिनाङ्के देहम् अत्यजत् इति उपलभ्यते।

कृतिः- संस्कृतभाषायां सः महान् पण्डितः बभूव। हरिं प्रति महत्याः श्रद्धायाः कारणात् माध्वसम्प्रदायानुसारेण भागवतस्य उपरि पदरत्नावलीटीकां व्यरचयत्। एतद्व्यतिरिच्य अपि सः महाभारततात्पर्यनिर्णयस्य उपरि यमकभारतस्य उपरि च टीकामरचयत्। दशावतारहरिगाथानामकम् एकं स्तोत्रम् अपि तेन विरचितम्। कृष्णाष्टकनामकस्यैकस्य अपरस्यापि अनुपलभ्यमानस्तोत्रस्य कर्तृत्वेन तम् केचित्[xvii] अभिप्रयन्ति।

3) श्रीवैष्णतोषिणीकृत् श्रीजीवगोस्वामी

गौडीयवैष्णसम्प्रदायस्य अन्यतमः प्रधानः सन्न्यासी आसीत् श्रीजीवगोस्वामी। सः रूपगोस्वामिनः सनातनगोस्वामिनः च भागिनेयः बभूव। अल्पवयसि एव सः संस्कृतव्याकरणे काव्ये च पठनं समाप्य सुपण्डितः अभवत्। बाल्याद् आरभ्य सः चैतन्यदेवस्य सेवायां स्वं नियोजयितुं सङ्कल्पं कृतवान्। आबाल्यादेव श्रीमद्भागवतस्य उपरि तस्य महती प्रीतिः आसीत्। अतस्तेन भागवतस्य उपरि प्रसिद्धा श्रीवैष्णवतोषिणीटीका व्यरचि।

देशः- श्रीकृष्णलीलायां याः विलासमञ्जर्यः बभूवुः ताः एव श्रीलजीवगोस्वामिरूपेण आविर्बभूव।[xviii] वङ्गप्रदेशस्य इदानीन्तनमालदहमण्डलस्य रामकेलिनामकग्रामे एतन्महात्मना जनिरलाभि। जीवगोस्वामिनां पितुर्नाम श्रीबल्लभः, यस्य नामान्तरं अनुपममालिकः इति। तथाह्युक्तं- "सुशीलः पण्डितः श्रीमान् जीवः श्रीबल्लभात्मजः"[xix] इति। एतन्मातुर्नाम तु नैव ज्ञायते।

कालः- श्रीगौडीयवैष्णवाभिधानानुसारं त्रयस्त्रिंशदधिकचतुर्दशशततमशकाब्दतः (१४३३) अष्टादशाधिकपञ्चदशशततमशकाब्दपर्यन्तं (१५१८) पञ्चाशीतिवर्षाणि एतेषां स्थितिकालत्वेन गण्यन्ते, केषाञ्चन विदुषां मते तु पञ्चपञ्चाशदधिकचतुर्दशशततमशकाब्दतः (१४५५) चत्वारिंशदधिकपञ्चदशशततमशकाब्दपर्यन्तं (१५४०) महात्मनां स्थितिकालः।[xx] अष्टादशाधिकषोडशशततमख्रीष्टाब्दे (१६१८) तस्य मृत्युः अभवत् इत्यपि केचित् कथयन्ति।[xxi]

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

कृतिः- भक्तिरत्नाकरग्रन्थे जीवगोस्वामिनश्चतुर्विंशतिग्रन्थानां नामोल्लेखः कृतः। ते च ग्रन्थास्तावत्- हरिनामामृतव्याकरणम्, सूत्रमालिका, धातुसंग्रहः, कृष्णार्चनदीपिका, गोपालविरुदावली, रसामृतशेषः, श्रीमाधवमहोत्सवः, श्रीसंकल्पकल्पवृक्षः, भावार्थसूचकचम्पू, गोपालतापनीटीका, ब्रह्मसंहिताटीका, भक्तिरसामृतसिन्धुटीका, उज्ज्वलनीलमणिटीका, योगसारस्तवटीका, अग्निपुराणस्थश्रीगायत्रीभाष्यम्, श्रीराधिकाकरपदस्थितचिह्नम्, गोपालचम्पू, क्रमसन्दर्भः, तत्त्वसन्दर्भः, भगवत्सन्दर्भः, परमात्मसन्दर्भः, कृष्णसन्दर्भः, भक्तिसन्दर्भः, प्रीतिसन्दर्भः च।[xxii] अन्ये तु पद्मपुराणानुसारं भगवतः पादपद्मस्य यत् वर्णनं प्राप्तं तदुपरि श्रीजीवगोस्वामिनः लेखः कश्चित् अस्ति इति कथयन्ति।[xxiii] क्वचित्तु हरिनामामृतव्याकरणम्, सूत्रमालिका, रसामृतशेषः, गोपालविरुदावली, श्रीमाधवमहोत्सवः, श्रीसंकल्पकल्पवृक्षः, ब्रह्मसंहिताटीका, भक्तिरसामृतसिन्धुटीका दुर्गमसंगमनी वा, उज्ज्वलनीलमणिटीका लोचनरोचनी वा, गोपालचम्पू, क्रमसन्दर्भः, तत्त्वसन्दर्भः, भगवत्सन्दर्भः, परमात्मसन्दर्भः, कृष्णसन्दर्भः, भक्तिसन्दर्भः, प्रीतिसन्दर्भः, श्रीमद्भागवतटीका, लघुवैष्णवतोषिणीटीका, सप्तसन्दर्भस्य उपरि टीका, गोपालतापनीटीका श्रीसुखबोधिनी वा, पद्मपुराणस्थयोगसारस्तोत्रटीका, गायत्रीव्याख्याविवृतिटीका, राधाकृष्णार्चनचन्द्रिका, धातुसंग्रहः, भावार्थसूचकचम्पू चेत्येतानि विंशतिपुस्तकानि तेन विरचितानि इति उक्तम्। [xxiv]

4) सारार्थदर्शिनीकृत् विश्वनाथचक्रवर्ती

श्रीमहतः महाप्रभोः तिरोधानात् अनन्तरं श्रीनिवासाचार्यः, नरोत्तमठाकुरः, श्यामानन्दप्रभुश्च शुद्धभक्तेः धारां वाहयन्ति स्म। एतेषु अन्यतमस्य नरोत्तमठाकुरस्य शिष्यपरम्परायाः चतुर्थः आसीत् श्रीलः विश्वनाथचक्रवर्तीठाकुरः। यस्य नामान्तरम् आसीत् हरिवल्लभदासः। सः बाल्यकालाद् एव मेधावी बभूव।

देशः- विश्वनाथचक्रवर्तिनः देशविषये तथा वैमत्यं नास्ति। गौडीयवैष्णवमतावलम्बी अचिन्त्यभेदाभेदवादी विश्वनाथचक्रवर्ती पश्चिमबङ्गस्थनदीयामण्डलस्य देवग्रामस्य राढीयविप्रकूले जनिम् अलभत इति सर्वजनस्वीकृतं मतम्। रामनारायणः तत्पितासीत्।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

कालः- विश्वनाथचक्रवर्तिनः जीवनवृत्तान्तस्य उपरि स्थितात् विकिपीडियास्थतथ्यात् गौडीयेतिहासाख्यात् जालसंपुटात् अस्य महात्मनः आविर्भावकालः १६३८[xxv] इति सिद्ध्यति। गौडीयवैष्णवाभिधानानुसारं विश्वनाथचक्रवर्तिनः समयः १६५४ खीष्टाब्दः[xxvi] इति सिद्धान्ततो भवति। परन्तु बैङ्गालरस्थस्य इस्कन्-मन्दिरस्य तथ्यानुसारं[xxvii] चतुःषष्ट्यधिकषोडशशततमखीष्टाब्दे (१६६४) लब्धजन्मनः अस्य महात्मनः देहत्यागः त्रिसप्तत्यधिकषोडशशततमखीष्टाब्दे (१६७३) इति एकत्र लभ्यते [xxviii]।

कृतिः- शुद्धभक्तनामकात् एकस्मात् जालपुटात् व्रजरीतिचिन्तामणिः, चामत्कारचन्द्रिका, प्रेमसम्पुटम्[xxix], गीतावली, सुबोधिनी[xxx], आनन्दचन्द्रिका[xxxi], श्रीगोपालतपनीटीका, स्तवामृतलहरी, श्रीकृष्णभावनामृतम्, श्रीभागवतमृतकणः, श्री-उज्ज्वलनीलमणिकिरणः, श्रीभक्तिरसामृतसिन्धुबिन्दुः, रागवर्त्मचन्द्रिका, ऐश्वर्यकादम्बिनी[xxxii], श्रीमाधुर्यकादम्बिनी, श्रीभक्तिरसामृतसिन्धुबिन्दुटीका, दानाकेलिकौमुदीटीका, श्रीललितामाधवनाटकटीका, श्रीचैतन्यचरितामृतटीका[xxxiii], ब्रह्मसंहिताटीका, भागवतस्य सारार्थवर्षिणीटीका सारार्थदर्शिनीटीका चेत्येते ग्रन्थाः विश्वनाथचक्रवर्तिना विरचिताः इति लभ्यते।[xxxiv] विश्वनाथचक्रवर्तिनः विकिपीडियापत्रे एतद्व्यतिरिच्य अपि कैमटकाराकंड्रिका इत्याख्यस्य अन्यस्य एकस्य अपि पुस्तकस्य नाम उपलभ्यते[xxxv]। विश्वनाथचक्रवर्तिठाकुराख्ये एकस्मिन् जालपुटे आनन्दवृन्दावनचम्पू, विदग्धामाधवनाटकम्, स्वप्नविलासामृतम् इत्येतत् अन्यत् पुस्तकत्रयम् अपि विश्वनाथेन विरचितम् इति उपलभ्यते[xxxvi]। अपि च क्वचित् आनन्दवृन्दावनचम्पूकाव्यस्य उपरि सुखवर्तिन्याख्या टीका, प्रेमभक्तिचन्द्रिकायाः टीका विदग्धमाधवस्य उपरि टीका, क्षणादगीताचिन्तामणिः, गोपीप्रेमामृतम्, गौराङ्गलीलामृतम्, स्वप्नविलासामृतम्, मन्त्रार्थदीपिका, गौराङ्गगङ्गाचन्द्रिका, संकल्पकल्पद्रुमः, रहवर्त्मन्चन्द्रिका, राधिकाध्यानामृतम्, रूपचिन्तामणिः, सुरतकथामृतम् इति एतानि पुस्तकानि अपि भगवता विरचितानि इति उल्लेखितम्[xxxviii]।

5) सत्यधर्मीयाकृत् सत्यधर्मतीर्थः

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

स्वभाष्यस्य कृते, भगवतः स्तुतेः कृते च सत्यधर्मतीर्थस्वामी सुपरिचितः अस्ति। सः शब्दानाम् अर्थस्य गभीरं यावत् अद्भूतरीत्या प्रविश्य व्याख्यानम् अकरोत्। सप्तमसर्गात् तेन विरचितायाः सत्यधर्मीयटीकायाः उपलभ्यमानः भागः पण्डितानां कृते स्वर्गसमानः अस्ति।

देशः- कर्णाटकराज्यस्य हावेरीमण्डलान्तर्गतस्य सावनूर इत्याख्यग्रामस्य माधवब्राह्मणपरिवारे द्वैतवेदान्तवादिनां सत्यधर्मतीर्थस्वामिनां जन्माभूत्। सत्यधर्मस्वामी माधवाचार्यप्रतिष्ठितस्योत्तरादिमठस्य अष्टाविंशतितममठाधीशः बभूव। एतस्य महात्मनः पूर्वाश्रमनाम नवरत्नपुरुषोत्माचार्यः। अतः श्रूयते ह्ययं श्लोकः- श्रीसत्यवरदुग्धाब्धेः उत्थिता जगतीतले। सुधा श्रीसत्यधर्माख्या पावयेत् स्मरतस्सतः।।[xxxviii] पूर्वाश्रमदिवसेषु एतत्परिवारस्थजनाः अतीव दरिद्राः बभूवुः, अतः अयं मन्त्रालयस्य श्रीराघवेन्द्रस्वामिनां कठोरतपः समाचर्य तत्प्रसादेन प्रसादितः अभूत्।

कालः- त्रिचत्वारिंशदधिकसप्तदशशाततमखीष्टाब्दे (१७४३) जनिं लब्ध्वा अयं महात्मा त्रिंशदधिकाष्टादशशाततमखीष्टाब्दे (१८३०) देहमत्याजत् इति विकिपीडियापत्रे उपलभ्यते[xxxix]। क्वचित् तस्य जन्मसमयः सप्तनवत्युत्तराधिकसप्तदशशाततमखीष्टाब्दतः त्रिंशदधिकाष्टादशशाततमखीष्टाब्दपर्यन्तं प्राप्यते परन्तु न तत् मतं युक्तम्। तस्य आश्रमवासस्य कालः एव त्रयस्त्रिंशद्वत्सरात् अधिकः आसीत्। स्वस्य जीवितसमयस्य मध्ये सप्तनवत्युत्तराधिकसप्तदशशाततमखीष्टाब्दतः जीवनकालस्य अन्तिमदिवसपर्यन्तम् अयम् उत्तरादिमठस्याधीशत्वेन स्वजीवनम् अत्यवीवहत्[xl]।

कृतिः- श्रीमद्भागवतस्य सप्तमस्कन्धतः द्वादशस्कन्धपर्यन्तम् एतैर्विरचिता सत्यधर्मीयाख्या व्याख्या प्राप्यते। एतद्व्यतिरिच्यापि प्रायः षड्विंशतिः ग्रन्थाः एतेन महात्मना विरचिताः इति उत्तरादिमठस्य जालस्थानस्य गुरुपरम्परांशात् प्राप्यते। ते यथा गंगालहरी, कविकण्ठमणिः, यदुवाराचरितामृतलहरी, भगवद्भजनम्, विरहिमोदासुधा, हितोपदेशः, श्रीरंगेश्वरशृंगारलहरी, नित्यसंसारलिंगभंगविचारः, गीतामाहात्म्यसारसंग्रहः, नमग्रहस्तोत्रम्, श्रीवदिराजस्तोत्रम्, श्रीसत्यवरस्तोत्रम्, अंतर्लापिकाः, बरिरलापिकाः, गुर्वाष्टकम् चेत्यादयः। एतद्व्यतिरिच्यापि श्रीलक्ष्मीनरसिंहस्त्रोत्रम्, नित्यसंसारिलिङ्गभङ्गविचारः, तत्त्वसङ्कायनटिप्पणी, नमकचमकव्याख्यानम्, श्रीमाधवभागवतटिप्पणी,

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

वीराटपर्वटिप्पणी, उद्योगपर्वटिप्पणी, रामायणटिप्पणी, विरहीमधुसुधाव्याख्यानम्, तरङ्गिणीश्लोकव्याख्यानम्, विष्णुतत्त्वनिर्णयटीका इत्येतानि[xli]।

6) भावार्थदीपिकाप्रकाशकृत् वंशीधरीकृत् वा वंशीधरशर्मा

सूत्रस्यार्थः यथा भाष्येण विशदीक्रियते तद्वदेव श्रीधरस्वामिना विरचितायाः भागवतस्य श्रीधरीटीकायाः गूढविषयान् विशदयति वंशीधरशर्मणा विरचिता भावार्थदीपिकाप्रकाशनामिका टीका वंशीधरीटीका वा। श्रीधरीटीकायाः भावार्थं विशदयितुं राधारमणगोस्वामिना दीपिकादीपिनीनामिकाम् एका टीका व्यरचि। परन्तु तस्याः टीकायाः श्रीधरीटीकायाः भावस्य प्रकाशने असमर्थत्वात् प्रौढपाण्डित्यपूर्णा सर्वावयवसम्पन्ना टीकेयं विरचिता।

देशः- वंशीधरशर्मा कौशिकगोत्रीयः गौडब्राह्मणः आसीत्। हिमाचलप्रदेशस्य खरडनामकस्थानस्य कुलीनब्राह्मणपरिवारे तेषां जन्माभवत्। तेषां पितुः नामासीत् निक्कारामः। अत एवोक्तं वंशीधरटीकायाः उपसंहारभागे- "खरडनामकमस्ति जनैर्युतं श्रुतिविधानपरायणमानसैः॥"[xlii], "तद्देहजो निगमविद्वजराजशर्मा यो ह्यन्ववायशुभदीपक आविरासीद्। धर्मात्मकं मधुरिपोरनुगं स निक्कारामं ह्यवाप तनयं विनयोपपन्नम्॥ तस्माद्वंशीधरो जातो गोत्रे कौशिकसंज्ञके।"[xliii] चेति। एतद्विद्वान् मालवेन्द्रनाभानरेशहीरासिंहमहाराजस्य सभापण्डितो बभूव।

कालः- एतट्टीकाकाराणां कालविषये नास्ति स्पष्टं तथ्यं किञ्चित्, परन्तु पञ्चाशीत्यधिकोनविंशशततमविक्रमाब्दे एतद्विरचितायाः वंशीधरीटीकायाः वेङ्कटेश्वरमुद्रणालयात् प्रथमप्रकाशनात् अमीषामुपस्थितिकालः अष्टाविंशत्यधिकाष्टादशशततमखीष्टाब्दतः (१८२८) नवत्युत्तराष्टादशशततमखीष्टाब्दपर्यन्तं (१८९०) समभवदिति अनुमीयते।

कृतिः- वंशीधरशर्मणः कृतित्वेन वंशीधरटीकाख्या एक एव ग्रन्थः उपलभ्यते।

7) अन्वितार्थप्रकाशिकाकृत् गङ्गासहायः

देशः- पण्डितोपाधिना कामदारोपाधिना वा विभूषितः आचार्यो गङ्गासहायो राजपूतानायाः अर्थात् वर्तमानसमये राजस्थानाख्यस्य सीकरमण्डलान्तर्गतस्य पाटनग्रामस्य एकस्मिन् कुलीनब्राह्मणपरिवारे जनिं लेभे। एतन्महाभागेन

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

स्वाचार्याणाम् आदेशानुसारं काशीं गत्वा वेदपुराणोपनिषदादिशास्त्राणाम् अध्ययनं समाप्य अत्यल्पकालादनन्तरमेव शास्त्रेषु गभीरा गतिः समपाद्यत। काश्यां बूँदीराज्यस्य शासकः तेन सह साक्षात्कृत्य राज्यशासनाय तस्य साहाय्यमयाचत। ततः सप्तसप्तत्युत्तराष्टादशशाततमखीष्टाब्दात् (१८७७) त्रयोदशाधिकोनविंशतिशाततमखीष्टाब्दपर्यन्तं (१९१३) बूँदीराज्यस्य (सम्प्रति राजस्थानस्था नगरीविशेषा) प्रधानामात्यो बभूव। बूंदीनगरस्य एकं द्वारमपि गङ्गासहायनाम्नाङ्कितम् अस्ति।

कालः- आचार्याणां गङ्गासहायानां कालः सप्तसप्तत्युत्तराष्टादशशाततमखीष्टाब्दतः (१८७७) पूर्वं ऊनत्रिंशदधिकोनविंशतिशाततमखीष्टाब्दपर्यन्तं (१९२९) वा अर्थात् ऊनविंशशताब्द्याः उत्तरार्धः विंशतिशताब्द्याः पूर्वभागः च[xliv]। प्रबन्धसाराख्यः एकः अधिनियमपुस्तकं तेन १८८० खीष्टाब्दे विरचितम्, अतः तस्य समयः तस्मात् पूर्वमेव इति मे मतिः।

कृतिः- स्वेषां जीवनकाले तैः चतुःपञ्चाशद्ग्रन्थाः विरचिताः। एतेषु ग्रन्थेषु श्रीमद्भागवत-अन्वितार्थप्रकाशिका, वंशप्रकाशः प्रभृतयः ग्रन्थाः प्रसिद्धाः। राजस्थानस्य साम्प्रतिकेषु संहिताबद्धाधिनियमपुस्तकेषु गङ्गासहायाचार्येण विरचितः प्रबन्धसाराख्यः ग्रन्थः प्रसिद्धतमः। एतत्पूर्वं स्थानीयनियमाः परम्पराणाम् उपरि आधारिताः आसन्।[xlv]

8) गूढार्थदीपिनीकृत् श्रीराममूर्तिशास्त्री पौराणिकः

भागवतस्य टीकाकारेषु आधुनिकतमोऽस्ति गूढार्थदीपिनीकारः श्रीराममूर्तिशास्त्री। सः पौराणिकाचार्यः आसीत्। अतस्तेन भागवतपुराणस्य यथार्थमर्म स्वटीकया सम्यग्रूपेण प्रकटीकृतम्। तेन विरचिता भागवतस्य गूढार्थदीपिनीटीका भागवद्वयेन उपलभ्यते।

देशः- गूढार्थदीपिनीकारस्य देशकालकृतिविषये न तथा निर्दिष्टं तथ्यम् उपलभ्यते। परन्तु गूढार्थदीपिनीटीकायाः मुखपृष्ठात्[xlvi], भक्तरञ्जनीसहितवेदस्तुतिग्रन्थस्य मुखपृष्ठात्[xlvii] चेदं ज्ञातुं शक्यते यत् सः काशीस्थगोयनकासंस्कृतमहाविद्यालयस्य पुराणशास्त्राध्यापको बभूव। तस्य गुरोर्नाम श्रीनारायणदत्तमिश्रः इत्यपि वेदस्तुतिग्रन्थस्य मुखपृष्ठादेवोपलभ्यते।

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

कालः- गूढार्थदीपिनीटीकायाः १९९३ खीष्टाब्दे, भक्तरञ्जनीसहितवेदस्तुतिग्रन्थस्य २०१० संवत्सरे च प्रकाशितत्वात् विंशशतकमेव राममूर्तिशास्त्रिणः समयः इति मे मतिः।

कृतिः- तस्य कृतित्वेन भागवतस्य गूढार्थदीपिनीटीका अपि च श्रीमद्भागवतदशमस्कन्धस्य सप्ताशीतितमाध्यायगतस्य वेदस्तुतिग्रन्थस्य भक्तमनोरञ्जिनीटीका च उपलभ्येते।

एवमत्र संक्षेपेण केषाञ्चित् भागवतटीकाकृतां देशकालकृतादिविषये आलोचितम्। एतद्व्यतिरिच्यापि सन्ति बह्व्यः टीकाः टीकाकाराश्च, तेषां काचित् सारणी अत्र प्रदर्श्यते –

क्रमः	टीका	टीकाकारः	पुस्तीशालाः
१	अन्वयबोधिनी	कविचूडामणिः	Ujjain-751: oudh IV.9; SSP.C111.P21; ASB H.3647
२	अमृततरङ्गिणी	ज्ञानपूर्णयतिः	Ben.2008-9; MD R2795; PU – 2008-9
३	अमृत-तरङ्गिणी	लक्ष्मीधरः	M.T.2795; TCD1.173. TD 8235; TG 337, 341.
४	आत्मप्रिया	नारायणः	TG. 350; Oppert 6083
५	आन्ध्रटीका		Adyar 21. M. 22
६	एकादशस्कन्दसार	ब्रह्मानन्दभारती	Oppert.11.5433. whish.11
७	एकादशस्कन्दसारसंग्रह		TG 353

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

८	कान्तिमाला	विष्णुपुरी	L.P. 240
९	कृष्णपदी	राघवानन्द मुनिः	MD.R.2763.2816,3023 10.8101; PU.1988 94.TG.294
१०	कृष्णवल्लभा	आनन्द महोपाध्यायः	TCD I. 178
११	केरल भाष्यव्याख्या		TG. 269, 293
१२	क्रमसन्दर्भ	श्री जीवगोस्वामिपादः	Ulwar 829; DU, 2435, 2455-57.
१३	क्रोडपत्रराज	केशव भट्टः	Ulwar 831
१४	गणदीपिका	कृष्णदासः	Kashim Bazar
१५	चित्सुखी	चित्सुखाचार्यः	Ulwar 829;
१६	चूर्णिका	माध्वः	P.U. 2020-23; Ulwar-817
१७	चूर्णिका तात्पर्य	माध्वः	A.K. 167
१८	चैतन्यमतचन्द्रिका	श्रीनाथ पण्डितः	A.S.B.H. 3634
१९	चैतन्यमतमञ्जुषा	श्रीनाथ चक्रवर्ती	G.L. Jayapur,

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

२०	जय मंगला (रामानुजीयः)	श्रीनिवासाचार्यः	TG. 254, 282; Oppert, 6085
२१	जयोल्लासनिधि	अप्पय दीक्षितः	IO. 6742
२२	टीकासार संग्रह	उत्तमबोध यतिः	TG.344-45; TCD.1.185
२३	तत्वदीपिका (रामानुजीयः)	श्रीनिवास सूरि	KB
२४	तत्त्वप्रदीपिका	नारायणयतिः	TCD. 1.180
२५	तत्त्वबोधिनी		IO. 8100
२६	तात्पर्यटिप्पनी	जनार्दन भट्ट	MD.R. 3287; CP.44.54
२७	तामिल टीका		MD. D 2622
२८	तोषिणीसारः		PU. 2012-13
२९	तोषिणीसारसंग्रहः	काशीनाथः	BU. 1295
३०	द्राविड टीका		Adyar 88
३१	न्यायमञ्जरी		TG 290
३२	पदयोजना	भवदास	MD.D 2465
३३	पदरत्नावली	विजयध्वज	Ulwar.820, MD.D 2233-4

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

३४	पदार्थसरसी		PU-2004
३५	पदत्रयी व्याख्या	सदानन्द विद्वान	AS. 111G9
३६	परमहंसप्रिया	वोपदेव	Ulwar 829
३७	प्रकाश	श्रीनिवास	Burnell. 1046; IO.3525
३८	प्रतिपदार्थप्रकाशिका	शोभनाद्रि	MD.R 1721, R 3658
३९	प्रबोधिनी		Burnell.1046
४०	प्रहर्षणी		AMC
४१	प्रेममंजरी	रामकृष्ण मिश्रः	Ben. 157
४२	बालप्रबोधिनी (वल्लभीयः)	गिरिधरः	ASBH 3597
४३	बृहतक्रमसंदर्भ (गौडिय)		Ben, 157
४४	भक्तरामा	वेकंटाचार्यः	Baroda-10312
४५	भक्तिदीपिका	जातवेदः	10.6740.TG. 346-47.
४६	भक्तिमती		TCD. 1.187
४७	भगवल्लीलाचिन्तामणिः		Bhr. 564
४८	भगवत्प्रसादसार	श्रीहरि सूरिः	ASB. H. 3648

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

४९	भागवत कौमुदी	रामकृष्णः	L. 1641
५०	भागवतगूढार्थदीपिका	धनपतिःसूरिः	Br. Mus.
५१	भागवतगूढार्थ रहस्य	भागवतानन्द्	
५२	भागवतचन्द्र चन्द्रिका (रामानूजीय)	वीरराघव	MD.R4523, D16086, Ulwar, 821
५३	भागवत टीप्पनी (गौडीय)	लोकनाथ चक्रवर्ती	ASB.H 3620, 3624
५४	भागवत तत्त्वसारः (गौडीय)	धामोहन शर्म गोस्वामी	ASB. H. 36232
५५	भागवततात्पर्यचन्द्रिका (माध्वः)	वेङ्कट कृष्णः	MD.D2238-41; R-2945; PU.2002
५६	भागवततात्पर्यदीपिका (माध्वः)	नृहरिः	PU.2016,2025; CP.26, Adyar.91
५७	भागवततात्पर्यनिर्णय	श्रीमध्वाचार्यः	PU.2024
५८	भागवततात्पर्यनिर्णय टिप्पणी (माध्वः)	यदुपति आचार्य	PU.2027, Adyar - 90

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

५९	भागवतपुराण-प्रकाश	प्रियादास	L. 681
६०	भागवतपुराणार्कप्रभा	हरिभानु शुक्ला	Oudh 1877
६१	भागवतमंजरी	गौतमकुल चन्द्रशर्मा	IO
६२	भागवतलीलाकल्पद्रुम		AMC
६३	भागवत वाख्यालेश	गोपाल चक्रवर्ती	IO.3517; ASB, H 3621.
६४	भागवतसारः	गोविन्दविद्याविनोदः	CCA.1. P.404
६५	भागवताद्यपद्य-व्याख्याशतक	वंशीधर शर्मा	AMCed
६६	भागवतार्थतत्त्वदीपिका	कौण्डिन्य भाष्यकार सूरिः	MD. R1572; R1755.6023; PU. 1995
६७	भागवतार्थ दीपिका	चक्रपाणिः	ASB.H 3637
६८	भावनामुकुर	शुकमुनि	TCD.1.184 (b)
६९	भागप्रकाशिका	नरसिंहाचार्यः	Oppert 367

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

७०	भावप्रकाशिनी (गौडीय)	रामनारायण मिश्रः	ASB.H 3641
७१	भावार्थ दीपिका	श्रीधरस्वामी	IO. 6722-39, 3460-3507; FTD.9836-9907; MD. D2199, 2224, 257-59.
७२	भावार्थ दीपिका क्रोडटिप्पनी	ब्रह्मानन्द् किकंर	BU. 1300
७३	भावार्थ दीपिका टीका	चैतन्यवन	ASB.H 3617
७४	भावार्थ दीपिका टीपनी	श्री राधा रमण गोस्वामी	VSP.1455-57
७५	भावार्थ दीपिका प्रकाश	काशीनाथ उपाध्यायः	ASB. H3642; BU. 1292-93
७६	भावार्थ दीपिका भाव	शिवरमण	PU.2017
७७	भावार्थ दीपिका स्नेहपूरणी	केशव दास	CCA.1.
७८	भावार्थ दीपिका		ASB.H.3616
			-वा-
	श्रीधरोक्ता-विशिताष्ट		-17

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

७९	भागवत तात्पर्य टीका संग्रह माध्वः	वेदगर्भ नारायण	MD.R 5345
८०	मुनिभावप्रकाशिका	कृष्ण गुरु	MD.D2229; R64, 2861; PU. 2010
८१	विवृतिप्रकाश	विठ्ठल दीक्षित	SB.120
८२	विशुद्धरसदीपिका	किशोर प्रसाद गौडीय	PU.2029; CPB 3640
८३	वुधरञ्जिनी	वासुदेवः	MD.R2952; ASB.H3643; L. 1730
८४	वैष्णवतोषिणी	श्रील सनातन गोस्वामी पादः	IO.3522-23; PU-2011 SB.115; DU. 2434,3445.
८५	वैष्णवानन्दिनी	श्री वलदेवविद्याभूषणः (गौडीय)	
८६	वोधसुधा	विद्यासागर मुनिः	TCD.1.181

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

८७	शुकतात्पर्यरत्नावली	वीर राघव	MD.D16063, 2230-32
८८	शुकपक्षीया (रामानुजीयः)	सुदर्शन सूरिः	MD.R1026, 3101, D2228, Ulwar - 816
८९	शुकभावप्रकाशिका	सुन्दरराज सुरिः	MD.R3780
९०	शुकहृदय-रञ्जिनी	नरसिंह सूरिः	MD.D 2237
९१	श्रुतिस्तुति चन्द्रिका	वेङ्कट	BU. 1299
९२	संक्षिप्त श्री वैष्णव तोषिणी (गौडीय)	श्री जीवगोस्वामी पादः	
९३	सज्जनहित	वेङ्कटाद्रि	MD. R2164
९४	सदर्थप्रकाशिका	शङ्करः	MD.R3668
९५	सरला	योगि रामानुजाचार्यः	Kasim Bazar
९६	सार संग्रह	ब्रह्मानन्द भारती	ब्रह्मानन्द भारती
९७	सारार्थ दर्शिनी	श्रील विश्वनाथ चक्रवर्ती	IO.3508-16; PU2003; ULWAR.813
९८	सिद्धान्तप्रदीप (निम्बर्कीय)	शुकदेव दास	Kasim Bazar

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

९९	सुबोधिनी	बल्लभाचार्यः	MD.D2243-46; IO3524

Endnotes

I. वैष्णवं दक्षिणो बाहुः शैवं वामो महेशितुः। ऊरू भागवतं प्रोक्तं नाभिः स्यान्नारदीयकम्॥ इति पद्मपुराणे, ३ खण्डः, ६२ अध्यायः, ३ श्लोकः

II. सरणिः पद्धतिः पद्या इति अमरपाठे ह्रस्वान्तः अयं शब्दः। बह्वादिभ्यश्च (४-१-४५) इति सूत्रेण बह्वादिगणपठितेभ्यः शब्देभ्यः विकल्पेन ङीष्-प्रत्ययः विधीयते। अयं च आकृतिगणः इत्यतः सरणी इत्यपि रूपम्।

III. द्रष्टव्यः श्रीधरस्वामी ग्रन्थः (दासः, करुणाकर। पृपृ. १५३-१५८)।

IV. श्रीमद्विष्णुपुराणसारविवृतिं कर्ता यतिः श्रीधर- । स्वामी सद्गुरुपादपद्ममधुपः साधु स्विधीशुद्धये॥२॥ इति विष्णुपुराणस्य आत्मप्रकाशटीकायाः मङ्गलश्लोके।

V. अनुपलभ्यमाना टीकेयम्

VI. द्रष्टव्यः श्रीधरस्वामी ग्रन्थः (दासः, करुणाकर। पृपृ. ५)

VII. चन्द्रमोहन महाराणा, *श्रीधरस्वामी*, उत्कल साहित्य, कटक, 1989, पृष्ठा – 77-78

VIII. कर्मसमुच्चयस्य उक्तिः

IX. श्रीधरीटीका, मङ्गलश्लोकः २

X. श्रीधरीटीका, पुष्पिका, श्लोकः १

XI. गीता, सुबोधिनीटीका, अन्तिमपद्यम्

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XII. Vide P.K.Gode's date of Sridhara Swamin, author of the commentaries on the Bhagavat Purana & other works (between A.D. – 1350 and 1450) – ABORI, Vol.XXX, Part III, pp.283

XIII. ब्रह्मसम्बोधिनीटाका, पुष्पिका

XIV. (दासः, करुणाकर। पुरोवाक्, पृपृ. XV)

XV. https://madhwasakha.com/guru/shri-hrshikesha-teertharu/436#:~:text=Sri%20Vijayadhwaja%20Theertha%20holds%20the,for%20an%20impressive%2029%20years 11-09-2024, 12:07 PM

XVI. https://www.sumadhwaseva.com/yatigalu/udupi-mutts/vijayadwaja-tirtharu/ 11-09-2024, 12:10 PM

XVII. https://www.sumadhwaseva.com/yatigalu/udupi-mutts/vijayadwaja-tirtharu/ 11-09-2024, 12:19 PM

XVIII. कर्पूरमञ्जरी श्याममञ्जरी श्वेतमञ्जरी। विलासमञ्जरी कामलेखा च मौनमञ्जरी।। गौरगणोद्देशदीपिका, श्लोकः-१९५

XIX. गौरगणोद्देशदीपिका, २०३ श्लोकः

XX. Bhaktivedanta Book Trust. HDG A.C. Bhaktivedanta Swami Srila Prabhupada - https://www.harekrsna.com/philosophy/bmgs/goswamis/jiva.htm , 13-09-2024 , 8:40 PM

XXI. Iskcon Bangalore https://www.iskconbangalore.org/blog/srila-jiva-goswami/ , 13-09-2024, 8:27 PM

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XXII. श्रीलजीवगोस्वामी (विकिस्रोतः)

XXIII. प्रभुपादपुस्तकम् - https://prabhupadabooks.com/d.php?qg=2344 , 13-09-2024, 8:10 PM

XXIV. Bhaktivedanta Book Trust. HDG A.C. Bhaktivedanta Swami Srila Prabhupada -

XXV. https://gaudiyahistory.iskcondesiretree.com/sri-visvanatha-cakravarti-thakura/

XXVI. गौडीय वैष्णव अभिधान, भाग – ३, पृपृ. - १३७०

XXVII. https://www.iskconbangalore.org/blog/sri-vishvanatha-chakravarti-thakura/ 13-09-2024, 9:00 PM

XXVIII. https://www.prabhupadarays.com/viswanatha-chakravarti-thakura/ 13-09-2024, 9:07 PM

XXIX. खण्डकाव्यम् – एकं काव्यं यत् केवलं कवितायाः आंशिकविशेषताम् अलंकरणं वा प्रकाशयति

XXX. अलंकारकौस्तुभस्य टीका

XXXI. उज्ज्वलानीलमणेः उपरि टीका

XXXII. अनुपलभ्यमाना

XXXIII. अपूर्णा

XXXIV. https://www.purebhakti.com/teachers/bhakti-yoga-masters/854-sri-vishvanatha-cakravati-thakur 14-09-2024, 10:17 AM

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XXXV. https://en.wikipedia.org/wiki/Visvanatha_Chakravarti 14-09-2024, 10:23 AM

XXXVI. https://www.stephen-knapp.com/vishvanatha_chakravarti_thakura.htm 14-09-2024, 10:35 AM

XXXVII. https://www.prabhupadarays.com/viswanatha-chakravarti-thakura/ 14-09-2024, 11:00 AM

XXXVIII. गुरुपरम्पराश्लोकः- ३२। (Uttaradimath-Shahalibanda)

XXXIX. https://en.wikipedia.org/wiki/Satyadharma_Tirtha 14-09-2024, 2:09 PM

XL. https://www.sumadhwaseva.com/yatigalu/uttaradi-mutt/satyadharma-thirtharu/ 14-09-2024, 2:21 PM

XLI. https://www.sumadhwaseva.com/yatigalu/uttaradi-mutt/satyadharma-thirtharu/ 14-09-2024, 3:01 PM

XLII. वंशीधरटीका, पुष्पिका, श्लोकः २

XLIII. वंशीधरटीका, पुष्पिका, श्लोकौ ५,६

XLIV. Records of the Government of India, Foreign Department, No – CCVIII, Report of the Political Administration of the Rajputana States, Superintendent of Government Printing India, 1885

XLV. https://en.wikipedia.org/wiki/Ganga_Sahai

XLVI. https://archive.org/details/sbgd1/mode/1up?view=theater

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

XLVII. https://archive.org/details/vKSX_veda-stuti-with-sanskrit-hindi-commentary-by-sri-rama-murthy-shastri-pauranika-1/page/n1/mode/1up?view=theater

Bibliography

संस्कृतपुस्तकानि –

- त्रिपाठी, ब. (2012). *श्रीमद्भागवत-महापुराणम् (श्रीधरीवंशीधरीटीकाद्वयोपेतम्) द्वितीयो भागः.* दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान.
- दासः, प. क. (२०२२). *श्रीधरस्वामी : एक अध्ययन.* दिल्ली: न्यू भारतीय बुक कर्पोरेशन.
- नॅ. (मन). *नन.* पप: म.
- रामतेजः, स. प. (2002). *श्रीमद्भागवतमहापुराणम् (अन्वितार्थप्रकाशिकाटीकोपेतम्).* दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान.
- रामनारायणः, अ. श. (आश्विनः, १३२९ बङ्गाब्दः). *गौरगणोद्देशदीपिका चतुर्थसंस्करणम्.* कलिकाता: संस्कृत पुस्तक भाण्डार.
- शास्त्री, श. (२०१० संवत्।). *वेदस्तुतिः.* दिल्ली: श्रीपौराणिक-कार्यालय.
- शास्त्री, स. श. (१९९३). *श्रीमद्भागवतम् (गूढार्थदीपिनीसंस्कृतटीकायुतम्) द्वितीयं संस्करणम्.* नई दिल्ली: चौखम्बा विद्याभवन.
- श्रीकर्णपूरः महाकविः, प. व. (१३२९ बङ्गाब्दः). *गौरगणोद्देशदीपिका.* कलिकाता: संस्कृत पुस्तक भाण्डार.

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

- संस्कर्ता आचार्य-श्रीसीतारामशास्त्री समीक्षकः श्रीगुरुप्रसादशास्त्री. (1950). *तर्कसंग्रहः (न्यायबोधिनीपदकृत्य वालमनोरमा-परीक्षाटीकाऽलंकृतः, किञ्च भाषाटीकाकाविराजितः).* वाराणसी: भार्गव पुस्तकालयः.
- सम्पा. के.टि पाण्डुरङ्गिः, स. क. (२००६). *श्रीमद्भागवतम् (श्रीआनन्दतीर्थविरचितभागवततात्पर्यनिर्णयेन श्रीसत्यधर्मतीर्थविरचितभागविवृत्या सहितम्), नवमं सम्पुटम्.* बेङ्गलूरु: द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठानम् .

बङ्गपुस्तकानि –

दास, ह. (১৪২১ বঙ্গাব্দ). *শ্রীশ্রীগৌড়ীয় বৈষ্ণব অভিধান (প্রথম খণ্ড).* কলিকাতা: সংস্কৃত বুক ডিপো.

आङ्गलपुस्तकानि –

Dandekar, R. K. (1950). *Annals of Bhandarkar Oriental Research Institute (volume XXX).* Poona: Bhandarkar Oriental Research Institute.

जालसङ्केताः –

1) श्रीविजयध्वजतीर्थवृन्दावनम्-https://www.sumadhwaseva.com/yatigalu/udupi-mutts/vijayadwaja-tirtharu/ (०९-०९-२०२४, ११:४० वादनम्)
2) माध्वशाखा-https://madhwasakha.com/guru/shri-hrshikesha-teertharu/436#:~:text=Sri%20Vijayadhwaja%20Theertha%20holds%20the,for%20an%20impressive%2029%20years. (०९-०९-२०२४, ११:४७ वादनम्)
3) पेजावर-अधोक्षज-मठः - https://web.archive.org/web/20110727171532/http://www.pejavara.org/guruparampara.htm (०९-०९-२०२४, १२:०० वादनम्)
4) इस्कन्-बैङ्गालुरु - https://www.iskconbangalore.org/blog/sri-vishvanatha-chakravarti-thakura/ (१७-०९-२०२४, १२:४० वादनम्)

MANANAMEDINĪ ISSN: Applied
A Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal Dedicated to Research in Sanskrit & Allied Disciplines
Volume: 1, Issue: 1 (August-September) 2026
Website: www.mananamedinijournal.in
Email id: mananamedinijournal@gmail.com

5) Bhaktivedanta Book Trust. HDG A.C. Bhaktivedanta Swami Srila Prabhupada - https://www.harekrsna.com/philosophy/bmgs/goswamis/jiva.htm (१७-०९-२०२४, १:४० वादनम्)
6) गौडीय-इतिहास- https://gaudiyahistory.iskcondesiretree.com/sri-visvanatha-cakravarti-thakura/ (१८-०९-२०२४, ११:४० वादनम्)
7) New Catalogus Catalogorum- https://vmlt.in/ncc/1?page=1 (२३-०५-२०२६, ३:३० वादनम्।)